एवाचार्य्यो वृतः तदा येन वृतः स तस्मै दक्षिणां दद्यात्। ब्रह्मचारी तु तत्रैव स्थाने दिनान्तं यावत् वाग्यतस्तिष्ठेत्। ततः प्राप्तायां सन्ध्यायां सन्ध्यामुपास्य कुशण्डिकोक्तविधानेन समुद्भवनामानमग्निं संस्थाप्य मन्त्रं जप्त्वा दक्षिणं जानुं भूमौ निधाय दक्षिणपश्चिमोत्तरक्रमेण उदकाञ्जलिसेकमग्निपर्य्युक्षणञ्च कृत्वा समिद्धोमं कुर्य्यात्। ततः प्रादेशप्रमाणघृताक्तसमित्त्रयं गृहीत्वा आद्यन्तयोस्तूष्णीं मध्ये समन्त्रकं अग्नौ जुहुयात्। ततः कर्म्मशेषोक्तविधिना पुनरपि अग्निपर्य्युक्षणोपक्रमं दक्षिणपश्चिमोत्तरक्रमेण उदकाञ्जलिसेकं कुर्य्यात्। ततः ब्रह्मचारी अग्निमभिवाद्य मन्त्रेणाग्निं विसृज्य अतीतायां सन्ध्यायां भिक्षालब्धमन्नं क्षारलवणवर्जितं सघृतमुदकेनाभ्युक्ष्य भक्षणप्रकरणोक्तविधिना भुञ्जीत। एतच्चाग्निकर्म्म समावर्त्तनपर्य्यन्तं प्रत्यहं सायं प्रातः कर्त्तव्यम्॥ इत्युपनयनकर्म्म समाप्तम्॥ इति भवदेवभट्टः॥ (ब्राह्मण-क्षत्त्रिय-वैश्यानामन्यतममन्वय-वयःशील-शौर्य्य-शौचाचार-विनय-शक्ति-बल-मेधा-धृति-स्मृति-मति-प्रतिपत्तियुक्तं तनुजिह्वौष्ठदन्ताग्रमृजुवक्त्राक्षिनासं प्रसन्नचित्त-वाक्चेष्टं क्लेशसहञ्च भिषक् शिष्यमुपनयेत्। अतो विपरीतगुणं नोपनयेत्।

उपनयनीयस्तु ब्राह्मणः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु प्रशस्तायां दिशि शुचौ समे देशे चतुर्हस्तं चतुरस्रं स्थण्डिलमुपलिप्य गोमयेन दर्भैः संस्तीर्य्य पुष्पैर्लाजभक्तैः रत्नैश्च देवताः पूजयित्वा विप्रान् भिषजश्च तत्रोल्लिख्याभ्युक्ष्य च दक्षिणतो ब्राह्मणं स्थापयित्वाग्निमुपसमाधाय खदिर-पलाश-देवदारु-विल्वानां समिद्भिश्चतुर्णां वा क्षीरवृक्षाणां न्यग्रोधोडुम्बराश्वत्थमधूकानां दधि-मधु-घृताक्ताभिर्दार्व्वीहौमिकेन विधिना-स्रुवेणाज्याहुतीर्जुहुयात्। सप्रणवाभिर्महाव्याहृतिभिस्ततः प्रतिदैवतमृषींश्च स्वाहाकारञ्च कुर्य्यात् शिष्यमपि कारयेत्॥ ब्राह्मणस्त्रयाणां वर्णानामुपनयनं कर्त्तुमर्हति राजन्यो द्वयस्य वैश्यो वैश्यस्यैवेति। शूद्रमपि कुलगुणसम्पन्नं मन्त्रवर्ज्जमनुपनीतमध्यापयेदित्येके॥ ततोऽग्निं त्रिः परिणीयाग्निसाक्षिकं शिष्यं ब्रूयात्। काम-क्रोध-लोभ-मोह-मानाहङ्कारेर्ष्यापारुष्य--पैशुन्यानृतालस्यायशस्यानि हित्वा नीच-नख-रोम्णा शुचिना कषायवाससा सत्यव्रतब्रह्मचर्य्याभिवादनतत्परेणावश्यं भवितव्यं मदनुमतस्थान-गमन-शयनासन-भोजनाध्ययन-परेण भूत्वा मत्प्रियहितेषु वर्त्तितव्यमतोऽन्यथा ते वर्त्तमानस्याधर्म्मो भवत्यफला च विद्या न च प्राकाश्यं प्राप्नोति। अहं वा त्वयि सम्यग्वर्त्तमाने यद्यन्यथादर्शी स्यामेनोभाग् भवेयमफलविद्यश्च। द्विज-गुरु-दरिद्र-मित्र-प्रव्रजितोपनत-साध्वनाथाभ्युपगतानां चात्मबान्धवानामिव स्वभेषजैः प्रतिकर्त्तव्यमेवं साधु भवति। व्याधशाकुनिक-पतित-पापकारिणां न च प्रतिकर्त्तव्यमेवं विद्या प्रकाशते मित्रयशो धर्म्मार्थकामांश्च प्राप्नोति॥

भवतश्चात्र॥

"कृष्णेऽष्टमी तन्निधनेऽहनी द्वे
शुक्ले तरेऽप्येवमहर्द्विसन्ध्यम्।
अकालविद्युत्-स्तनयित्नुघोषे
स्वतन्त्रराष्ट्रक्षितिपव्यथासु॥
श्मशानयानायतनाहवेषु
महोत्सवौत्पातिकदर्शनेषु।
नाध्येयमन्येषु च येषु विप्रा-
नाधीयते नाशुचिना च नित्यम्"॥

इति सुश्रुते सूत्रस्थाने द्वितीयोऽध्यायः॥)

उपनायः, पुं, (उपनीयते आचार्य्यसमीपमिति। उप+नी+घञ्।) उपनयनम्। इति हेमचन्द्रः॥

उपनायकः, पुं, (उपमितो नायकेन।) नायकगुणोत्कर्षकथकः। यथा,—

"नायकस्य गुणोत्कर्षकथका उपनायकाः"।

इति सङ्गीतदामोदरः॥ *॥ उपपतिश्च॥ (उपनयतीति। उप+नी+ण्वुल्। प्रापके, त्रि॥)

उपनाहः, पुं, (उपनह्यते ऽस्मिन्। उप+नह+घञ्।) वीणादितन्त्रबन्धनस्थानम्। तत्पर्य्यायः। निबन्धनम् २। इत्यमरः॥ व्रणालेपपिण्डः। इति मेदिनी॥ प्रलेप इति भाषा। (यथाह सुश्रुतः।

"आदौ विम्लापनं कुर्य्यात् द्वितीयमवसेचनम्।
तृतीयमुपनाहञ्च चतुर्थीं पाटनक्रियाम्"॥)

उपनिधिः, पुं, (उपनिधीयते इति। उप+नि+धा+कि।) उपन्यस्तवस्तु। स्थाप्यद्रव्यम्। तत्पर्य्यायः। न्यासः। २। इत्यमरः॥

("वासनस्थमनाख्याय हस्ते न्यस्य यदर्पितम्।
द्रव्यमुपनिधिः प्रोक्तः स्मृतिषु स्मृतिवेदिभिः"॥

वासुदेवपुत्त्रः। इति विष्णुपुराणम्॥)

उपनिषत्, [द्] स्त्री, (उपनिषद्यते प्राप्यते ब्रह्मविद्या अनया इति। उप+नि+सद्+क्विप्।) धर्म्मः। वेदान्तशास्त्रम्। निर्ज्जनस्थानम्। इति मेदिनी॥ (वेदशिरोभागः। तत्र चतुर्णां वेदानां अशीतिसहितशताधिकसहस्रसंख्यका उपनिषदः। तथाहि। ऋचः एकविंशतिः। यजुषो नवाधिकशतम्। साम्नः सहस्रम्। पञ्चाशदुपनिषदोऽथर्वणस्य॥ ब्रह्मविद्या।) समीपसदनम्। इति त्रिकाण्डशेषः॥ तत्त्वम्। इत्यमरटीकायां भरतः॥ (द्विजातिकर्त्तव्यो व्रतभेदः। यथा, आश्वलायनगृह्यकारिका।

"प्रथमं स्यात् महानाम्नी द्वितीयञ्च महाव्रतम्।
तृतीयं स्यादुपनिषद् गोदानञ्च ततः परम्"॥)

(मुक्तिकोपनिषदि अष्टाधिकशतोपनिषद्भेदाः प्रदर्शिताः। यथा,—

"ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः॥७॥
ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं तथा॥१०॥
ब्रह्म कैवल्य-जावाल-श्वेताश्वा हंस आरुणिः॥१६॥
　　　१　　२　　३　४　　५
गर्भो नारायणो हंसो विन्दुर्नाद-शिरः शिखा॥२३॥
मैत्रायणी कौषितकी बृहज्जावाल-तापनी॥२७॥
कालाग्निरुद्र-मैत्रेयी सुबाल-क्षुरि-मन्त्रिकाः॥३२॥
　　　　　　　　७
सर्व्वसारं निरालम्बं रहस्यं वज्रसूचिकम्॥३६॥
　८　९　१०　११
तेजोनाद-ध्यान-विद्या-योगतत्त्वात्मबोधकम्॥४२॥
　१२　　१३　　　१४　　　　१५
परिव्राट्-त्रिशिखी-सीता-चूडानिर्व्वाण-मण्डलम्॥४८॥
　　१६　　　　　　　१७
दक्षिणाशरभं स्कन्दं महानारायणाऽद्वयम्॥५३॥
　१८
रहस्यं रामतपनं वासुदेवञ्च मुद्गलम्॥५७॥
　　　　　　　१९　　　२०
शाण्डिल्यं पैङ्गलं भिक्षु महत्शारीरकं शिखा॥६३॥
　　　　　　२१
तुरीयातीत-संन्यास-परिव्राजाक्षमालिका॥६७॥
　　　२२
अव्यक्तैकाक्षरं पूर्णा सूर्य्याक्ष्यध्यात्म-कुण्डिका॥७४॥
सावित्र्यात्मा पाशुपतं परब्रह्मावधूतकम्॥७९॥
　　　　　२३
त्रिपुरातापनं देवी त्रिपुरा कठ-भावना॥८४॥
　　२४　२५　　　२६　२७
हृदयं कुण्डली भस्म रुद्राक्षगण-दर्शनम्॥९०॥
　　　　　　　　　　　२८
तारसार-महावाक्य-पञ्चब्रह्माग्निहोत्रकम्॥९४॥
गोपालतापनं कृष्णं याज्ञवल्क्यं वराहकम्॥९८॥
शाट्यायनी हयग्रीवं दत्तात्रेयं च गारुडम्॥१०२॥
२९　　　　　३०
कलि-जावालि-सौभाग्य-रहस्य-ऋच-मुक्तिकाः"॥१०८॥

अत्र स्थितानामेकदेशवाचिशब्दानां विवृतिः।

१ हंसः परमहंसः। २ विन्दुरमृतविन्दुः। ३ नादोऽमृतनादः। ४ शिरोऽथर्व्वशिरः। ५ शिखाथर्व्वशिखा। ६ तापनी नृसिंहतापनी। ७ रहस्यं शुकरहस्यम्। ८ तेजः तेजोविन्दुः। ९ नादो नादविन्दुः। १० ध्यानं ध्यानविन्दुः। ११ विद्या ब्रह्मविद्या। १२ परिव्राट् नारदपरिव्राट्। १३ त्रिशिखी त्रिशिखीब्राह्मणः। १४ चूड़ा योगचूड़ामणिः। १५ मण्डलं मण्डलब्राह्मणः। १६ दक्षिणा दक्षिणामूर्त्तिः। १७ अद्वयं तारकः। १८ रहस्यं रामरहस्यम्। १९ महत् महोपनिषत्। २० शिखा योगशिखा। २१ परिव्राजः परमहंसपरिव्राजकः। २२ पूर्णाऽन्नपूर्णा। २३ कठः कठरुद्रः। २४ कुण्डली योगकुण्डली। २५ भस्मः भस्मजावालः। २६ गणः गणपतिः। २७ दर्शनं जावालदर्शनम्। २८ अग्निहोत्रकं प्राणाग्निहोत्रम्। २९। कलिः कलिसन्तरणम्। ३० रहस्यं सरस्वतीरहस्यम्॥

आसां मध्ये या यद्वेदान्तर्गतास्ता अपि तत्रैव प्रदर्शिताः। यथा,—

सामवेदान्तर्गताः षोड़शसंख्यका उपनिषदः।

अव्यक्तम् १ आरुणिः २ कुण्डिका ३ केनः ४ छान्दोग्यम् ५ (या)जावालदर्शनम् ६ जावाली ७ महत् ८ मैत्रायणी ९ मैत्रेयी १० योगचूड़ामणिः ११ रुद्राक्षम् १२ वज्रसूचिकम् १३ वासुदेवम् १४ संन्यासम् १५ सावित्री १६॥ *॥

शुक्लयजुर्व्वेदान्तर्गता ऊनविंशतिसंख्यकाः उपनिषदः यथा,—

अतीताध्यात्मम् १ ईशावास्यम् २ (जा)यावालम् ३